*Belles-Lettre 2023, Vol. 1, pp. 92-98*

# शुक्लयजुर्वेदे प्रतिफलितं भारतीयजीवनम्

पिंकि खातुन

सर्वेषां धर्मानां तथा च ज्ञानानां मूलं हि वेदः। ज्ञानार्थकविद् धातोरुत्तरं घञ् प्रत्ययेन निष्पन्नस्य वेदशब्दस्यार्थः परमज्ञानम्। पाश्चात्यवेदविद् म्याक्समूलर वेदशब्दस्यार्थविषये उक्तम् - "The knowledge par excellence, i.e the sacred, the religious knowledge." परमपुरुषस्य निःश्वासरूपः वेदः अपौरुषेयः। ऋषयः वेदस्य द्रष्टा। सायण-कात्यायन-आपस्तम्ब प्रमुखानामाचार्यानां मतानुसारं मन्त्रब्राह्मणभागयोर्समष्टिरेव वेदः । यद्यपि वेद इत्यनेन मन्त्र-ब्राह्मण-आरण्यक-उपनिषद् इति चतुर्विधानां ग्रन्थानां समष्टिरेव बोध्यते। सायण प्रमुखानां वेदलक्षणं प्राचीनतमवेदलक्षणमिति मन्यते। वेदस्य अनेकानां समार्थकशब्दानां मध्ये एकः शब्दः 'त्रयी'।'त्रयी' इत्यनेन त्रिविधं वेदमन्त्रं वोध्यते। अथर्ववेदे त्रिविधं वेदमन्त्रमुलभ्यत्वात् वेद इत्यनेन अथर्ववेदोऽपि बोध्यते। चतुर्णां वेदानां मध्ये यजुर्वेद अन्यतमः। यज्ञेन सह प्रत्यक्षरूपेण सम्पर्कत्वात् एतन्नामकरणम्। यजुर्वेदस्य भागद्वयमस्ति, यथा- कृष्णयजुर्वेदः, शुक्लयजुर्वेदश्च। वायुपुराणे तथा च विष्णुपुराणे कृष्णशुक्लयोः नामकरणविषये आख्यायिका परिलक्ष्यते। शुक्लयजुर्वेद वाजसनेयीसंहिता नाम्नापि अभिहितम्। शुक्लयजुर्वेदस्य द्रष्टा महर्षिः याज्ञवल्क्यः। सूर्यदेवः वाजीरूपं धृत्वा सम्पद्स्वरूपं शुक्लयजुर्वेदं याज्ञवल्क्याय अददत् एतदर्थं शुक्लयजुर्वेदस्य एतन्नामकरणम्। वृहदारण्यकोपनिषदानुसारं याज्ञवल्क्यस्य मातुर्नाम वाजसनिः। वाजसनेः पुत्रः दृष्टत्वाद् शुक्लयजुर्वेदस्य नाम वाजसनेयीसंहिता इति नामकरणम् एवं विधं मतं प्रचलितम्। शुक्लयजुर्वेदे अध्ययसंख्या ४०, अनुवाकसंख्या ३०३, कण्डिकासंख्या १९१५। अस्य वेदस्य ब्राह्मणं शतपथब्राह्मणं, आरण्यकं वृहदारण्यकम्, उपनिषद् वृहदारण्यकोपनिषद्। अधुनापि शुक्लयजुर्वेदस्य एकप्रकारं पाठं प्राप्यते।

शौनकः तस्य 'चरणव्यूह' इति ग्रन्थे शुक्लयजुर्वेदस्य षोडशसंख्यकानां शाखानामुल्लेखं कृतं परन्तु अधुनापि अस्य वेदस्य काण्वमाध्यन्दिनौ इति शाखाद्वयमुपलभ्यते।

ऋग्वेदस्य अनेकाः मन्त्राः शुक्लयजुर्वेदे प्राप्यते। तथापि बहुविधं विषयं केवलमेव शुक्लयजुर्वेदे प्राप्यते न तु ऋग्वेदे। शुक्लयजुर्वेदे जातिभेदप्रथा, नारीपुरुषाणां जीविका, अन्त्यजातेरुद्भवं (निसादः, कैवर्तः, मैनालः, पौल्कसः, चण्डालः, किरातः वैन्दासः प्रभृतयश्च) रुद्र-शैवधर्मयोरुद्भवं - प्रभृतीनामालोचनाविषये अस्य वेदस्य स्वकीयत्वं परिलक्ष्यते।

..............................................................................

**शोध छात्रा, संस्कृतविभाग:, यादवपुर विश्वविद्यालय**

## * शुक्लयजुर्वेदे प्रतिफलितं सामाजिकजीवनम्

ऋग्वेदानुसारं सिन्धुनदमुभयतः आर्यसभ्यतायाः विकाशमभवत्। शुक्लयजुर्वेदस्य भौगलिकविवरणानुसारं तदनीन्तनसमये आर्यसभ्यता उत्तरमध्यभारतवर्षपर्यन्तं विस्तृतमभवत्। शुक्लयजुर्वेदे सुस्पष्टरूपेण किमपि पर्वतस्य उल्लेखं नास्ति, एकस्मिन्नेव स्थाने मूजवानस्य उल्लेखं प्राप्यते। शब्दोऽयं ऋग्वेदस्य अक्षसूक्तेऽपि दृश्यते। तत्र विभीतकवृक्षः जायते। नवममण्डलेऽपि सोमस्य उत्पत्तेः स्थानरूपेण मूजवानस्य उल्लेखमस्ति। केषाञ्चिन्मते स्थानमिदं हिमालयपर्वतस्य किमपि स्थानम्। शुक्लयजुर्वेदे सप्तसिन्धोः, सरस्वत्याः उल्लेखं दृश्यते। ऋग्वेदे सरस्वती देवीरूपेण मानवीरूपेण च स्तूयते। शुक्लयजुर्वेदे नदीरूपापेक्षया वाग्देवीरूपेण अधिकवर्णना दृश्यते। नदीरूपेण सरस्वत्याः वर्णना वारमेकं प्राप्यते ।

ऋग्वेदसंहितानुसारं सरस्वती समुद्रमपतत्। परन्तु पञ्चविंशब्राह्मणे(२५.१०.१), शतपथब्राह्मणे(१.४.१.१४) विनशननामके स्थाने विलुप्तमभवत् एतदेव विवरणं प्राप्यते। शुक्लयजुर्वेदे सरस्वतीनद्याः पञ्चभिः नदीभिः सह सस्रोतसा गमणस्य उल्लेखं प्राप्यते -

"पञ्चनद्याः सरस्वतीमपि यन्ति सस्रोतसा ।
सरस्वती तु पञ्चधा सो देशोऽभवत्सरित् ।।" [१]

भाष्यकारः उवटमतानुसारं तथा च महीधरमतानुसारम् एताः पञ्चनद्याः - दृषद्वती, शतद्रूः, चन्द्रभागा, विपाशा, इरावती च। शुक्लयजुर्वेदस्य २०.८४,८५,८६ एतेषु मन्त्रेष्वपि सरस्वती अन्नदात्री, धनदात्री, यज्ञस्य फलदात्री, सत्यस्य प्रचोदयित्रीरूपेण वर्णना उपलभ्यते। शुक्लयजुर्वेदस्य १९.९३-९४ मन्त्रानुसारं सरस्वती अश्विद्वयस्य उल्लेखं पत्नी। २२.२० मन्त्रानुसारं सरस्वती वाग्देवी, शुद्धा, महती। ऋग्वेदस्य दशममण्डले(१०.७५.५) गङ्गानद्या उल्लेखं दृश्यते। षष्ठमण्डले (६.४५.३१) 'गाङ्ग्य' इति शब्दस्य उल्लेखमस्ति परन्तु अनेन गङ्गा बोध्यते एतद्विषये भाष्यकाराणां मध्ये मतवैपरीत्यं परिलक्ष्यते। शुक्लयजुर्वेदसंहितायां कुत्रापि गङ्गानद्याः वर्णना नोपलभ्यते।

ऋग्वेदे उल्लेखितानां बहुविधानं उपजातीनां वर्णना शुक्लयजुर्वेदे न दृश्यते। पाञ्जावप्रदेशस्य उपजातिरूपेण पुरुस्, अनुस्, द्रुह्यस्, यदुस्, तुर्वस् एतेषां वर्णना ऋग्वेदे सुस्पष्टरूपेण ऋग्वेदे प्राप्यते परन्तु अत्र एतेषामालोचना स्वल्परूपेण दृश्यते। शुक्लयजुर्वेदानुसारं कुरुः तथा च पाञ्चालः उपजातिः। ऋग्वेदे भौगोलिकस्थानरूपेण कुरुनामकस्य स्थानस्य उल्लेखं दृश्यते न तु उपजातिरूपेण। शुक्लयजुर्वेदे (२३.१८) उपजातिरूपेण मगधस्य उल्लेखमस्ति परन्तु ऋग्वेदानुसारं मगधः भौगोलिकस्थानमेकम्। महीधरः तदीये भाष्ये (३०.५) मगधः इत्यनेन मगधदेशवासीनं प्रातिलोमविवाहेन उत्पन्नं संकरजातिं वा बोध्यते - 'मागधं म गधदेशजं क्षत्रियां वैश्य पुंसे जातं वा'। शुक्लयजुर्वेदे धैवरः,मैनालः कैवर्तः, पुञ्जिष्ठः प्रभृतीनामुपजातीनां वर्णना प्राप्यते। यस्यां किमपि उल्लेखं न दृश्यते।

**जातिभेदः-** वर्णाश्रमव्यवस्था तथा च जातिभेदव्यवस्था द्वयमेव पृथकविषयम्। वैदिकयुगे न केवलं मनुष्याणां मध्ये वर्णाश्रमं प्रचलनमासीत् देवानां तथा च पुशूनां मध्येऽपि एतद्विभाजनमासीत्। देवानां मध्ये वृहस्पतिः ब्राह्मणः, इन्द्रः क्षत्रियः, मरुद्गनाः वैश्याः, पुषा च शुद्रः। उद्भिदानां मध्येऽपि सोमः क्षत्रियः। वर्णाश्रमव्यवस्था अर्वाचीनकाले जातिभेदप्रथारूपेण आत्मप्रकाशं कृतवान्। ऋग्वेदस्य पुरषसूक्तवद् शुक्लयजुर्वेदस्य पुरुषमेधाध्याये चतुर्णां वर्णानामुल्लेखं प्राप्यते। अस्य वेदस्य १२.२३ मन्त्रे पञ्चमवर्णरूपेण ‘पञ्चजनाः’ इति शब्दस्य उल्लेखं प्राप्यते। जातिभेदप्रथायाः निदर्शनं शुक्लयजुर्वेदे न परिलक्ष्यते। अस्य अध्यनेन ज्ञायते यत् तस्मिन्नेव काले सर्वेषां समप्राधान्यमासीत्। शुक्लयजुर्वेदस्य १४.२८,३० मन्त्रे आर्यशब्देन वैश्यमभिहितम्। शुकलयजुर्वेदस्य १८.४८ मन्त्रे चतुर्वणानामुद्दिश्यं परमेश्वरं निकषा मङ्गलजनकं स्तुतिं परिलक्ष्यते-‘...रूचं नो धेहि ब्राह्मणेषु रूचं वैश्येषु शूद्रेषु’।[२] वाजसनेयीसंहितायां कुत्रापि शूद्रं प्रति निन्दासूचकं मनोभावं न परिलक्ष्यते। १४.३०,२०.१७ मन्त्रद्वये शूद्रः आर्येन वैश्येन वा सह उपमीयते। २०.१७ मन्त्रेन ज्ञायते यत् शूद्रं प्रति हीनमनोभावं अपराधरूपेण परिगण्यते, ईश्वरं विना प्रायश्चित्तकर्मणाऽपि अस्य अपराधस्य निष्कृतिं नास्ति। शतपथब्राह्मणे (६.४.४.९), तैत्तिरीयब्राह्मणे (१.२.६.७,२.३.९.१०) श्रौतग्रन्थेषु शूद्रं प्रति निन्दासूचकं मनोभावं परिलक्ष्यते।

**विवाह -** शुक्लयजुर्वेदे आलोचिता विवाहव्यवस्था ऋग्वेदवत्। वाल्यविवाहस्य उल्लेखमत्र न दृश्यते। शुक्लयजुर्वेदस्य ११.६२मन्त्रानुसारं कथ्यते यत् अस्मिन्नेव काले विधवाविवाहस्य प्रचलनं नासीत्। अत्र विधवां प्रति मृतपत्युः धनरक्षणस्य विवरणं प्राप्यते। तदा बहुविवाहव्यवस्था प्रचलनमासीत्। शुक्लयजुरवेदस्य द्रष्टा याज्ञवल्कस्य द्वयोः पत्न्योः तथा च राज्ञः चतसृणां पत्नीनामुल्लेखं प्राप्यते। परन्तु एतत् वक्तुं शक्यते यत् वहुविधानां धनाधिकारीनां वहुविवाहस्य दृष्टान्तं वेदे परिलक्ष्यते न तु साधारणजनस्य। ब्राह्मणेन अधस्तनानां त्रयवर्णानां मध्ये, क्षत्रियस्य अधस्तनयोः वर्णद्वयोर्मध्ये विवाहं स्वीकृतमासीत्। शुक्लयजुर्वेदस्य २३.३०-३१ सूक्तानुसारतः ज्ञायते यत् तदानीन्तनकाले वैश्यशूद्रयोर्विवाहं स्वीकृतं नासीत्। भिन्नगोत्रे तथा स्वजात्यां वर्णे वा विवाहमधिकं प्रशंसनीयमासीत्। विपरीते वर्णे उत्पन्नं सन्तानं निकृष्टरूपेण परिगण्यते। अनेनैव अनुलोमजेन प्रतिलोमजविवाहेन निषादप्रभृतीनां मिश्रवर्णानाम् उत्पन्नमभवत् तदानीन्तनकाले। शुक्लयजुर्वेदस्य ८.२६,२८,३२,११.५० सूक्तेषु मन्त्रेषु वा वैवाहिकजीवनस्य उद्देश्यं गुरुत्वञ्च वर्णितम्। १२.८.२६ मन्त्रे उक्तम् - ‘...वृषा सत्यं, योषा श्रद्धा वृषा मनो येषा वाक् यत्रैव पतिस्तत्र चक्षे’ इति।

**शिक्षा -** वैदिकयुगे दीक्षाग्रहाणानुष्ठानेन वैदिकशिक्षायाः प्रारम्भं भवति। दीक्षाग्रहणस्य कीदृशं महत्त्वमासीत् तदेव अनेन ज्ञायते - ‘ब्रतेन दिक्षामाप्नोति दिक्षामाप्नोति दक्षिणां दक्ष्णा श्रद्धामाप्नोति श्रद्धया सत्यमाप्यते’। वेदं विना ज्योतिषशास्त्रं, योगशास्त्रं,

भौगलिकशास्त्रं, अङ्कशास्त्रं,, चिकित्साविज्ञानं, जलविज्ञानं एतानि विषयानि वैदिकशिक्षार्थीनां पाठ्यान्तर्गतमासीत्। शुक्लयजुर्वेदे(१७.२) यज्ञवेदनिर्माणार्थमिष्टकानां संख्याविषये 'दश', 'नियुतं', 'कोटि', 'अर्वुदं', 'न्यर्वुदं', 'निखर्व', 'महापद्म', 'संख्या', 'समुद्र' 'अन्त', 'परार्ध' एताः शब्दाः प्राप्यन्ते। अनेन तदानीन्तनकालस्य अङ्कशास्त्रविषये सम्यकज्ञानं भवति। वितर्कमेव वैदिकशिक्षायाः माध्यममेकमासीत्। शुक्लयजुर्वेदस्य २३.९,१०,११,१२ मन्त्रे वितर्कविषये आलोचना परिलक्ष्यते। तदानीन्तनकाले व्याकरणचर्चायाः प्रचलनमासीदेतदेव शुक्लयजुर्वेदेन ज्ञायते। अस्य वेदस्य अष्टादशाध्यायस्य एकोनवतितमे सूक्ते नाम-आख्यात-उपसर्ग-निपातानां,वर्तमानादिकालत्रयानां, नित्यकार्ययोः, कारकसप्तकानां तथा च त्रयाणां वचनानामुल्लेखं प्राप्यते। अस्मिन्नेव वेदे द्वयोः प्रकारयोः आचार्यस्य उल्लेखं परिलक्ष्यते। एकप्रकारः आचार्यः स्वगृहं स्थित्वा छात्रेभ्यः शिक्षाप्रदानं करोति अपरः आचार्यः स्थानं स्थानं च भ्रमित्वा शिक्षाप्रदानं कुर्वन्ति। ईदृशः आचार्यः चरकनाम्ना परिचीयते। छात्राचार्ययोः निविडं सुसम्पर्कं परिलक्ष्यते अस्मिन् वेदे। अत्र त्रयप्रकारणां छात्रानामुल्लेखं प्राप्यते- आदित्यब्रह्मचारी, रुद्रब्रह्मचारी, वसुब्रह्मचारी। यो ब्रह्मचारी अष्टचत्वारिंशद्वर्षपर्यन्तं दारपरिग्रहणं न करोति तथा च स्वाध्यायेन उत्तमज्ञानस्य अधिकारी भवति सः आदित्यब्रह्मचारी नाम्ना अभिहीयते। षट्त्रिंशद्वर्षपर्यन्तमविवाहितं स्वाध्याये निरतं ब्रह्मचारी रुद्रब्रह्मचारी, चतुर्विंशतिर्वषपर्यन्तमविवाहितं साधारणज्ञानविशिष्टं ब्रह्मचारी वसुब्रह्मचारी।

शुक्लयजुर्वेदे स्पष्टरूपेण विदुषीरमण्याःपरिचयं नोपलभ्यते। १३०.१८ मन्त्रे देवतारूपेण इडा-भारती-सरस्वतीनामुल्लेखं प्राप्यते। ११.५९ मन्त्रे आचार्यया छात्रां प्रश्नकरणं, ११.६१मन्त्रे आचार्यया छात्रायै कौमार्यपालनस्य उपदेशस्य विवरणं प्राप्यते ।

**क्रीडा -** शुक्लयजुर्वेदे अश्वधावनं, रथधावनं, अक्षक्रीडायाः उल्लेखं विद्यते । त्रयमेव वैदिकयुगे चित्तविनोदनस्य अन्यतममाध्यमरूपेण परिगण्यते। अश्वमेधयज्ञे, अश्वधावनं, वाजपेययागे रथधावनं तथा च अक्षक्रीडायाः अनुष्ठानं भवति । यज्ञत्रयमेव श्रेष्टयज्ञरूपेण परिगण्यते। वेदे कुत्रापि अक्षाक्रीडापद्धतेः सुस्पष्टमालोचना न प्राप्यते। ऋग्वेदस्य अक्षसूक्ते अक्षक्रीडाविषये उक्तं यत् - 'त्रिपञ्चाशः क्रीडेति', 'नीचा वर्तन्ते उपरि स्फुरन्ति' इति। यः अक्षक्रीडां करोति सः कितव नाम्ना अभिहीयते। शुक्लयजुर्वेदस्य पुरुषमेधसूक्ते कितवाचकाः अनेकाः समार्थकाः शब्दाः परिलक्ष्यन्ते, यथा - आदिनवदर्शः, कलापिनः, अधिकलापिनः, सभास्थानुः प्रभृतयश्च।

**खाद्यं पानीयञ्च** - शुक्लयजुर्वेदे उल्लेखितं प्रधानखाद्यशस्यद्वयं हि धान्यं गोधूमञ्च। ऋग्वेदे कुत्रापि अनयोः शस्ययोः उल्लेखं नास्ति। एकस्मिन्नेव स्थाने (१९.२२) 'धाना' शब्दस्य प्रयोगं परिलक्ष्य ते परन्तु द्वयमेव पृथकम्। घृतेन भर्जितं यवं 'धाना' कथ्यते। शुक्लयजुर्वेदे द्विविधप्रकारस्य धान्यस्य उल्लेख दृश्यते, यथा - श्यामाकः नीवारश्च। अस्य

वेदस्य १९.१३.८१,२१.४२ मन्त्रेषु लाजानामुल्लेखं परिलक्ष्यन्ते। १९.२१ सूक्ते मन्त्रमेकं प्राप्यते तत्र अनेकप्रकाराणां खाद्यद्रव्यानां तथा च पानीयद्रव्यानामुल्लेखं दृश्यते -...'धाना: करम्भः सक्तवः परिवापः पयो दधि, सोमास्य रूपं हविष आमिक्षा वाजिनं मधु'।[३] शुक्लयजुर्वेदस्य अपरमन्त्रे (३.२०) विविधप्रकाराणां दुग्धजातद्रव्यानामुल्लेखं परिलक्ष्यते। १९.२३.९१ कर्कन्धुफलस्य, १९.२०.९० मन्त्रे वदरस्य, १९.२२.८९ मन्त्रे कुवलयनामकस्य फलस्य उल्लेखं प्राप्यते। पानीयद्रव्यरूपेण परिस्रुतस्य (१९.१५,२०.५९,२१.२९), मासरस्य (१९.१४.८२,२०.६८)), किलालस्य (१९.१४) उल्लेखं शुक्लयजुर्वेदे उपलभ्यते। तदानीन्तनकाले मांसभक्षणस्य प्रचलनमासीत्। गोमांसभक्षणस्य आसीत् न वा एतद्विषये मतवैपरीत्यं परिलक्ष्यते।

- **शुक्लयजुर्वेदे प्रतिफलितं राजनैतिकजीवनम्**

शुक्लयजुर्वेदे शासक इत्यस्मिन्नर्थे एकराट्, विराट्, स्वराट्, सत्रराट्, राजा, सम्राट् एतेषां शब्दानामुल्लेखं परिलक्ष्यते। शासकार्थं विविधयज्ञानुष्ठानस्य विधानं संहितायां दृश्यते।शतपथब्राह्मणे उक्तं यत् - राजसूयानुष्ठानेन राजा, वाजपेययागानुष्ठानेन सम्राड् भवितुं शक्यते जनः - राजसूयेनेष्ट्वा राजा भवति सम्राड् वाजपेयन । गोपथब्राह्मणानुसारं राजासूययागादनन्तरं वाजपेययागस्य अनुष्ठानं भवति। अश्वमेधयागेन यजमानः स्वराट् पुरुषमेधयागेन विराट्, सर्वमेधयागेन सर्वराट् भवति यजमानः। वैदिकयुगस्य राजकार्यपरिचालनार्थं गुरुत्वपूर्ण प्रतिष्ठानद्वयं सभा च समितिः च। शुक्लयजुर्वेस्य३.४५,२०.१७,२६.२४ मन्त्रेषु प्रतिष्ठानद्वयस्य उल्लेखं दृश्यते। सभायाः प्रधानं सभापतिरुच्यते। सभायामुपस्थितान् जनान् सभेयः कथ्यते। पुरुषमेधाध्याये(३०.६) सभायामुस्थितान् जनान् सभाचारः कथ्यते। राज्ञः सहायकरूपेण शुक्लयजुर्वेदे रत्निन्, मन्त्रिन्, सेनानी(१६.२६, १६.१७, १५.१५), पत्तिः(१६.१९), ग्रामणी(१५.१५, ३०.२०), संग्राहितृ, भागदुघः अक्षावापः प्रमुखानामुल्लेखं शुक्लयजुर्वेदे प्राप्यते।

पुरुषमेधाध्याये(३०.५,९,१८) रुद्राध्याये (१६.२१,२२) अपराधकार्यस्य सुविस्तृतं विवरणं प्राप्यते। पुरुषमेधाध्याये अपराधस्य विचारस्य वर्णना अपि परिलक्ष्यते। शुक्लयजुर्वेदे सुरासक्तजनस्य प्रायश्चित्तरूपेण सौत्रामणियागस्य, ब्राह्मणवधस्य प्रायश्चित्तरूपेण अश्वमेधयागस्य विधानं दृश्यते।

पुरुषमेधाध्याये, तथा च रुद्राध्याये इषुकारः रथकारः प्रभृतीनां वहुप्रकाराणां जनानामुल्लेखं प्राप्यते। रुद्राध्याये सहस्रसंख्यकानां युद्धास्त्राणामुल्लेखं प्राप्यते।

- **शुक्लयजुर्वेदे प्रतिफलितं धर्मीयजीवनम्**

**देवता-** देवतायाः संख्याविषये भिन्नं भिन्नं मतं प्राप्यते। ऋग्वेदस्य ३.९.९ मन्त्रे देवतायाः संख्याविषये उक्तम् -'त्रीणि शता त्री-सहस्राणि अग्निं त्रिंश्च देवाः नव चासपर्यान्'।[४] अस्य मन्त्रस्य शुक्लयजुर्वेदे(३३.७) पुनरुल्लेखं दृश्यते। शुक्लयजुर्वेदसंहितायाः ३४.४७,२०.११

सूक्ते त्रयस्त्रिंशद् संख्यकानां देवानामुल्लेखं दृश्यते- 'त्रया देवा एकादश त्रयस्त्रिंशाः सुराधशः' इति।[५] अत्र वर्णिताःद्युलोकस्थानीयाः देवाः - द्युः, वरुणः, सूर्यः, सवितृ, पूषा, मित्रः, विष्णुः, विवस्वत्, पूषान्, भागः, आदित्यः, उषा, अश्विनौ। अन्तरीक्षस्थानीया देवाः - इन्द्रः, मरुद्देवाः, वायुः, रुद्रः, पर्जन्यः, आपः, त्वष्टा, प्रजापतिः, विश्वकर्मन्। पृथिवीस्थानीयाः देवाः - अग्निः, सोमः, पृथिवी।

शुक्लयजुर्वेदे ऋग्वेदे वर्णितानां कतिपयानां नारीदेवानां पुनरुल्लेखं दृश्यते, यथा - अदितिः, सिनीवाली सरसवती, इडा भारती च।

**सृष्टितत्त्वम्** - ऋग्वेदस्य सृष्टितत्त्वविषयकमालोचनायाः पुनरुल्लेखं शुक्लयजुर्वेदे दृश्यते। शुक्लयजुर्वेदस्य १२.१०२, १३.१८, १३.४-५, १४.२८-३१, २३.६३ प्रभृतीषु सूक्तेषु सृष्टितत्त्वमालोचितम्। शतपथब्राह्मणे उच्यते यत् यज्ञात् प्रजाः उत्पद्यन्ते - 'यज्ञात् वै प्रजाः प्रजायन्ते'। ऋग्वेदस्य पुरुषसूक्ते यज्ञात् सृष्टेः विवरणं परिलक्ष्यते।

**एकेश्वरवादतत्त्वम्**- एकेश्वरवादविषये यदालोचनं शुक्लयजुर्वेदे प्राप्यते तस्य मूलं हि ऋग्वेदः। एकेश्वरवादविषये ऋग्वेदस्य हिरण्यगर्भसूक्तस्य (१०.१२१) द्वितीयमन्त्रं शुक्लयजुर्वेदे (२५.१३) परिदृश्यते। हिरण्यगर्भः प्रजापतिः - 'प्रजापतिर्वै हिरण्यगर्भः प्रजापतेरनुरूपत्वाय'(तै.सं.५.५०१.२)। प्रजापतिः परमात्मास्वरूपः तस्य किमपि प्रतिमा नास्ति - 'न तस्य प्रतिमा अस्ति'(३२.३)।[६] यास्काचार्येणापि स्वीकृतं यत् सर्वेषां मूलं एकैव आत्मा -

"महाभाग्याद् देवतायाः एक एव आत्मा वहुधा स्तूयते।
एकस्यात्मनोऽन्ये देवाः प्रत्यङ्गानि भवन्ति"॥[७]

एकेश्वरवादविषये प्रथमा आलोचना ऋग्वेदस्य प्रथममण्डले(१.१६४.४६) सूक्ते प्राप्यते - 'एकं सद् विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः'। शुक्लयजुर्वेदस्य एकेश्वरवादस्य श्रेष्ठनिदर्शनं हि मन्त्रमिदम् -

"ईशावास्यमिदं सर्वं यत् किञ्च जगत्यां जगत्।
तेन त्यक्तेन भूञ्जीथा मा गृधः कस्यस्विद्धनम्॥[८]

**उल्लेखपञ्जिः**


१. *शुक्लयजुर्वेदे*, वासुदेव लक्षणशास्त्रि पणशीकर, पृ ५६२
२. तदेव, पृ ३५१
३. तदेव, पृ ३६५
४. तदेव, पृ ५३५
५. तदेव, पृ ३८६
६. तदेव, पृ ५३०
७. *निरुक्त*, तारकनाथ अधिकारी, पृ २७

८. *शुक्लयजुर्वेदे*, वासुदेव लक्षणशास्त्रि पणशीकर, पृ ६०४

**ग्रन्थपञ्जी**


* *शुक्लयजुर्वेदे*, सम्पा. वासुदेव लक्षणशास्त्रि पणशीकर, मुम्वय्यां, पाण्डुरङ्ग जावजीश्रेष्ठिना, १९२९

* *ऋग्वेदसंहिता* (प्रथमभागः), सम्पा. परशुरामचक्रबर्ती, कलकाता, रामकृष्णमिशन इन्सटिटिउट अव कालचार, २०१६(प्रथमसंस्करणम्)

* गोपथब्राह्मणम्, सम्पा. विजयपालो विद्यावारिधिः, कलकाता, सावित्री देवी बागडिया ट्रष्ट, १९८०

* वसुः, योगीराजः ; *वेदेर परिचय*, कलकाता, फार्मा. के. एल. एम्. प्राइभेट् लिमिटेड, २०१३(नवममुद्रणम्)

* अधिकारी, तारकनाथ; *निरुक्त*, कलकाता, संस्कृत वुक डिपो, २०१४

* शास्त्री, चिन्वस्वामी; *यज्ञतत्त्वप्रकाशः*, वाराणसी, मोतिलाल बनारसिदास प्राइभेट् लिमिटेड, १९९२

* Bosu, Jogiraj ; *India of the age of Brāhmaṇas*, Calcutta, Sanskrit Pustak Bhandar, Year of publication not found.

* Macdonnel. A. A, Keith. A. B ; *Vedic Index of Names and Subjects* Vol-3, Delhi, Motilal Banarsidass Private Limited, 1982(rpt.)

* **Vājasaneyī Saṃhitā, Śukla Yajurveda** (Kanva recension with Sayana’s commentary) Ed. by Madhava Sastri, varanasi, 1915

* *Vājasaneyī Saṃhitā, Śukla Yajurveda* (Madhyandina recension with commentaries of Uvata and Mahidhara) Ed. by Vasudeva Lxman Sastry, Bombay, Nirnay Sagar Press, 1929